मृतेः परीक्षा योगीशी-
मेलकादिविधिस्तथा ।
व्याख्याविधिः श्रुतविधि-
र्गुरुपूजाविधिस्त्वियत् ॥३२२॥

नैमित्तिकप्रकाशाख्ये
ऽप्यष्टाविंशाह्निके स्थितम् ।
अधिकार्यात्मनो भेदः
सिद्धपत्नीकुलक्रमः ॥३२३॥

अर्चाविधिर्दौतविधी
रहस्योपनिषत्क्रमः ।
दीक्षाभिषेकौ बोधश्चे-
त्येकोनत्रिंश आह्निके ॥३२४॥

मन्त्रस्वरूपं तद्वीर्य-
मिति त्रिंशे निरूपितम् ।
शूलाब्जभेदो व्योमेश-
स्वस्तिकादिनिरूपणम् ॥३२५॥

पं० ६ ग० पु० विधिमौंनिविधी रहस्येति पाठः ।

Indira Gandhi National
Centre for the Arts

विस्तरेणाभिधातव्य-
मित्येकत्रिंश आह्निके ।
गुणप्रधानताभेदाः
स्वरूपं वीर्यचर्चनम् ॥ ३२६ ॥

कलाभेद इति प्रोक्तं
मुद्राणां संप्रकाशने ।

इत्यादि न केवलमेवं, यावत् अन्यदपि अस्य माहात्म्यं स्यात् इत्याह 'इति सप्ताधिकां, संप्रकाशने' इत्यन्तम् । इह ग्रन्थकृता तत्त्वतः समस्तव्यस्तत्वेन सप्तत्रिंशदाह्निकानि उपनिबद्धानि इति । यथा पृथ्वीतत्त्वे भेदस्य प्राधान्यात् स्थूलेन रूपेण सर्वमस्ति, तथा इहापि वक्ष्यमाणम् इत्युक्तं 'सर्वस्योद्देशनं क्रमात्' इति । परोपाये इति – शाम्भवोपाये, अस्य च अविकल्पकमेव रूपम् इत्युक्तप्रायं, तच्च भेदाभावे सति भवेत्, स च वाच्यवाचकात्मनो विश्वस्य संविदेकरूपत्वे सति स्यात्, तत्र वाच्यात्मनो विश्वस्य चित्प्रतिबिम्बत्वेन सामान्यविशेषात्मतया

पं० १६ ख० पु० विश्वस्य विश्वचिदिति पाठः ।

Indira Gandhi National Centre for the Arts

द्विविधस्य, वाचकात्मनो विश्वस्य च परामर्शोदय-क्रममन्त्राद्यभिन्नरूपत्वाभ्यां संविदनतिरेकात् तदेक-रूपत्वमुच्यते इत्यत्र एतत्प्रमेयत्रयोपक्षेपः। शाक्तस्य च विकल्पकमेव रूपम् इति प्रथमं विकल्पस्यैव संस्कार उक्तः, स च हेयाद्यालोचनद्वारेण तर्केण अभिधीयते इति तदनन्तरं तत्तत्त्वम्। अन्यच्च शुद्धविद्यात्मनस्तर्कस्यैव विस्फूर्जितं यत् तद्वशादेव सद्गुरुप्राप्तिर्भवेत् इति तत्सतत्त्वमुक्तम्। तर्क एव च साक्षाद्योगस्याङ्गम् इति अन्येषां योगाङ्गानामनुप-योगित्वम्—तर्कस्य च शुद्धविद्यात्मतया भेदभावक-मायीयविकल्पप्रतिघातित्वात् कल्पितस्य अर्चादेर-नादरः तत एवाविकल्पसंस्कारस्य दार्ढ्यात् संवि-च्चक्रोदयः, तदुदय एव च मन्त्राणां परं वीर्यं, तथामर्श एव च वास्तवं जप्यादि, अत एव च संविदि भेदाभावात् निषेधविधितुल्यत्वम् इत्येतन्नवसंख्याकं प्रमेयमुपक्षिप्तम्। एवमाणवादावपि बुद्धिध्यानादेः साक्षात्तदौपयिकत्वम् इत्येतदस्माभिः—स्पष्टत्वात्

पं० ५ क० पु० स चाहन्ताद्यालोचनद्वारेणेति, ख० पु० स चोपायाद्यालो-चनेति पाठः।

ग्रन्थविस्तरभयात् अग्रे च निर्णेष्यमाणत्वात् न प्रातिपद्येन व्याख्यातम् इति स्वयमेव अवधार्यम् ॥ २८४–३२६ ॥

ननु एकीकाराह्निकादौ किमिति न अनुजोद्देशः कृतः ? इत्याशङ्क्याह

द्वात्रिंशतत्त्वादीशाख्या-
त्प्रभृति प्रस्फुटो यतः ॥ ३२७ ॥

न भेदोऽस्ति ततो नोक्त-
मुद्देशान्तरमत्र तत् ।

द्वात्रिंशं तत्त्वं स्वरूपं यस्य तन्मुद्राह्निकं, तस्मात् द्वात्रिंशसंख्यादनन्तरं यत् ईशाख्यं त्रयस्त्रिंशमेकीकाराह्निकं तत आरभ्य भेदस्य प्राधान्याभावात् अनुज उद्देशो न कृतः इत्यर्थः ॥३२७॥

ननु यद्यतः प्रभृति भेदो नास्ति तत्किमिति आह्निकान्तरपरिगणनमेव कृतम् इत्याशङ्क्याह

मुख्यत्वेन च वेद्यत्वा-
दधिकारान्तरक्रमः ॥३२८॥

Indira Gandhi National Centre for the Arts

एतदुपसंहरन्नन्यदवतारयति

इत्युद्देशविधिः प्रोक्तः
सुखसंग्रहहेतवे ।
अथास्य लक्षणावेक्ते
निरूप्येते यथाक्रमम् ॥३२९॥

अस्य इति–उद्दिष्टस्य प्रमेयजातस्य ॥३२९॥

इदानीमाह्निकार्थमेव संचिनोति

आत्मा संवित्प्रकाशस्थितिरनवयवा
संविदित्यात्तशक्ति-
व्रातं तस्य स्वरूपं स च निज महस-
श्छादनाद्द्वन्द्वरूपः ।
आत्मज्योतिःस्वभावप्रकटनविधिना
तस्य मोक्षः स चायं
चित्राकारस्य चित्रः प्रकटित इह य-
त्संग्रहेणार्थ एषः ॥३३०॥

इह आत्मनस्तावत् धामत्रयीबाह्यप्रकाशविलक्षणः

पं० ४ क० पु० लक्षणापेक्षया तत्र इति पाठः ।

पं० १० ग० पु० निजमहिमाच्छादनाद्द्वन्द्वरूपः इति पाठः ।

पं० १३ क० पु० स चास्य इति पाठः ।

Indira Gandhi National
Centre for the Arts

संविद्रूप एव प्रकाशः स्वरूपं, संविच्च निरवयवा इति एक एव अखण्डप्रकाशरूपः इति यावत् । अत एव च

'शक्तिश्च नाम भावस्य स्वं रूपं मातृकल्पितम् ।'

इत्याद्युक्तयुक्त्या तस्य आत्मनः क्रोडीकृतानन्तशक्तिकं स्वरूपम्, एवमद्वयात्मत्वेऽपि स एव अतिदुर्घटकारित्वलक्षणात् स्वस्वातन्त्र्यात्, निजस्य—अनन्यसाधारणस्य ज्ञत्वकर्तृत्वलक्षणस्य, महसो गोपनात् ग्राह्यग्राहकात्मकं द्वन्द्वमाभासयन्

'............शिव एव गृहीतपशुभावः ।'

इत्याद्युक्तयुक्त्या 'बद्धः' इत्युच्यते, एवमपि तस्य आत्मनः प्रत्यावृत्त्या

'मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः ।
स्वरूपं चात्मनः संवित्.................. ॥'

इत्याद्युक्तयुक्त्या ज्ञत्वकर्तृत्वलक्षणस्य स्वमहस एव प्रथनं मोक्षः, यदर्थमेव च तत्तदनन्तशास्त्रात्मक इयान् परिकरः । तदाह 'स चायम्' इत्यादि, स चायं मोक्षः—तत्तद्गृहीताधरदर्शनभूमिकस्य अस्य

पं० ८ ग० पु० महिम्नो गोपनादिति पाठः ।

Indira Gandhi National Centre for the Arts

'रागाद्यकलुषोऽस्म्यन्तः शून्योऽहं कर्तृतोज्झितः ।'

इत्याद्युक्तयुक्त्या चित्रस्वभावस्य, यद्वा

'तेनाजडस्य भागस्य पुद्गलाण्वादिसंज्ञिनः ।
अनावरणभागांशे वैचित्र्यं बहुधा स्थितम् ॥'

इत्यादिनीत्या चित्राकारस्य

'अतः कंचित्प्रमातारं प्रति प्रथयते प्रभुः ।
पूर्णमेव निजं रूपं कंचिदंशांशिकाक्रमात् ॥'

इत्याद्युक्त्या चित्रः शाम्भवाद्यावेशात्मा प्रकटितः, इह इति – अस्मिन्नाह्निके । ययोर्बन्धमोक्षयोः संग्रहेण संक्षेपेण एषोऽर्थः प्रकटितः इत्यनेनैव संबन्धः ॥३३०॥

ननु आत्मनः स्वरूपप्रथनमेव 'मोक्षः' इत्युक्तम्, आत्मा चैक एव अखण्डः इति तत्प्रथात्मनो मोक्षस्यापि वैचित्र्यं कुतस्त्यम् ? इत्याशङ्क्याह

मिथ्याज्ञानं तिमिरमसमान्
दृष्टिदोषान्प्रसूते

पं० ३ क० पु० तेनाजडविभागस्येति, संज्ञित इति च पाठः ।

पं० ५ ख० पु० चित्रस्वभावस्य इति पाठः ।

पं० ८ क० पु० इत्याद्युक्तयुक्त्या इति पाठः ।

Indira Gandhi National Centre for the Arts

तत्सद्भावाद्विमलमपि त-
द्भाति मालिन्यधाम ।
यत्तु प्रेक्ष्यं दृशि परिगतं
तैमिरीं दोषमुद्रां
दूरं रुन्ध्येत्प्रभवतु कथं
तत्र मालिन्यशङ्का ॥ ३३१ ॥

तिमिरम्—आणवमलमेव मिथ्याज्ञानं भेदप्रथात्मकम् अपूर्णं वेदनं, दृष्टेः पूर्णायाः संवित्तेः, असमान्—आत्मनि अनात्माभिमानादिरूपान् दोषान् जनयति इति मिथ्याज्ञानसद्भावात् विमलं पूर्णमपि तत् ज्ञानं मालिन्यधाम भाति—स्वस्वातन्त्र्याद्पूर्णेन आत्मना परिस्फुरति इत्येतावानर्थः इति व्यवह्रियते, यत् पुनरुपेयत्वेन प्रेक्षणीयम्—अवश्यज्ञातव्यं परप्रमात्रेकात्म पूर्णं ज्ञानं

'नाहं प्राणो नैव शरीरं न मनोऽहं
नाहं बुद्धिर्नाहमहङ्कारधियौ च ।
योऽत्र ज्ञांशः सोऽस्म्यहमेव .... ।'

पं० १३ क० पु० पुनरुपमेयत्वेनेति पाठः ।

Indira Gandhi National Centre for the Arts

इत्यादिनीत्या उद्वेष्टनक्रमेण विमर्शपदवीमारूढं सत्, मिथ्याज्ञानसमुत्थाम् अनात्मनि आत्माभिमानरूपां दोषमुद्रां दूरं रुन्ध्येत् – आत्मन्येव आत्माभिमानेन तिरस्कुर्यात्, तत्र का नाम मालिन्यशङ्का तत्र संभावनापि न भवेत् इति वस्तुवृत्तेन बन्धो मोक्षो वापि न नाम कश्चिदस्ति इति का वा नाम तत्र वैचित्र्यसंभावना स्यात्। अनेन चाभिप्रायेण

'संसारोऽस्ति न तत्त्वतस्तनुभृतां बन्धस्य वार्तैव का
बन्धो यस्य न जातु तस्य वितथा मुक्तस्य मुक्तिक्रिया।
मिथ्यामोहकृदेष रज्जुभुजगच्छायापिशाचभ्रमो
मा किंचित्त्यज मा गृहाण विरम स्वस्थो यथावस्थितः॥'

इत्यादि अन्यत्र उक्तम्। अथ च तिमिरेण नेत्ररोगविशेषेण दृष्टौ अन्यथाज्ञानात्मदोषजातमुत्पादितं प्रेक्ष्येण अञ्जनादिस्थानीयेन रोध्यते इति तत्र मालिन्यशङ्कापि न भवति इति औपम्यं ध्वनितम् ॥३३१॥

इदानीमस्य शास्त्रस्य परं गाम्भीर्यं मन्यमानो ग्रन्थकृत्, एतदर्थसतत्त्वमजानानैरपि अन्यैरन्यथा-

---

पं० ४ ख० पु० का नाम अग्रिमात्र संभावना न प्रभवेत् इति पाठः।

Indira Gandhi National Centre for the Arts

बोधेन यत्किंचित् उत्तानमेव अन्यथा उच्यते, तान्प्राति अप्रस्तुतप्रशंसया उपहसितुमाह

भावव्रात ? हठाज्जनस्य हृदया-
न्याक्रम्य यन्नर्तयन्
भङ्गीभिर्विविधाभिरात्महृदयं
प्रच्छाद्य संक्रीडसे ।
यस्त्वामाह जडं जडः सहृदयं-
मन्यत्वदुःशिक्षितो
मन्येऽमुष्य जडात्मता स्तुतिपदं
त्वत्साम्यसंभावनात् ॥३३२॥

हे भावव्रात—नीलाद्यर्थ ? आत्मनो हृदयं तेन आत्मतथ्यं रूपं गोपयित्वा जनस्य सर्वस्यैव वादिनो हृदयानि आशयान् बलात्कारेण आक्रम्य

'अद्यास्मानसतः करिष्यति सतः किं नु द्विधा वाप्ययं
किं स्थास्नूनुत नश्वरानुत मिथोभिन्नानभिन्नानुत ।
इत्थं सद्वदनावलोकनपरैर्भावैर्जगद्वर्तिभि-
र्मन्ये मौननिरुद्धरमानहृदयैर्दुःखेन तैः स्थीयते ॥'

पं० ७ ग० पु० सहृदयंमन्योऽत्र दुःशिक्षित इति पाठः ।
पं० १७ ग० पु० दुःखमतः स्थीयते इति पाठः ।

Indira Gandhi National Centre for the Arts

इत्यादिस्थित्या विविधाभिर्भङ्गीभिः नर्तयन् यत् संक्रीडसे—नटवत् अतात्त्विकेन रूपेण समुल्लससि, अतः स सर्वो वादी असहृदयमपि आत्मानं सहृदयत्वेन मन्यमानोऽत एव दुःशिक्षितो मिथ्याभिमानात् अकिंचिज्ज्ञः, त्वां भावव्रातं, जडम्—अचेतनम् आह, अतोऽस्माभिरुत्प्रेक्ष्यते—यत् अमुष्य वादिनो वस्तुतश्चैतन्यस्वभावेन भवता यत् साम्यं तस्य संभावनात् भाववत्त्वमेव जडात्मा इति यद्युच्यते सा अस्य निन्दास्थाने स्तुतिः। भावानां हि वस्तुतश्चैतन्यमेव रूपम् अचेत्यमानत्वे हि तेषां न किंचिद्रूपं स्यात्, अतस्तदेव ये न जानते ते जडेभ्योऽपि जडाः इति कथं च तेषां चेतनात्मकैर्भावैः निन्दापर्यवसायि साम्यं स्यात् इति भावः । एवं प्रकृतेऽपि अस्य ग्रन्थस्य यस्तत्त्वं न जानाति मा ज्ञासीत्, प्रत्युत अन्यथापि यत्किंचन वक्ति इत्यसावेव जडो, न पुनरस्य ग्रन्थस्य कश्चिद्दोषः इत्यर्थः ॥३३२॥

ननु यद्येवं तर्हि एतच्छास्त्राधिगमाय केषांचन

पं० ६ क० पु० भावानां हि भावना वस्तुत इति पाठः ।

Indira Gandhi National Centre for the Arts

परेषां विदुषामभ्यर्थना क्रियतां, यदत्र यथावस्त्वेव बुद्ध्वा द्वेषो मा कार्यः ? इत्याशङ्क्याह

इह गलितमलाः परावरज्ञाः
शिवसद्भावमया अधिक्रियन्ते ।
गुरवः प्रविचारणे यतस्तद्-
विफला द्वेषकलंकहानियाच्ञा ॥३३३॥

इह द्वये पुरुषाः सन्ति – अनायातशक्तिपाता आयातशक्तिपाताश्च, तत्र पूर्वेषां शतशोऽभ्यर्थितानाम् एतदधिगमाय मनोऽपि न प्रसरति, इत्यत्र अवधातव्यम्, द्वेषो माकार्यः इत्यभ्यर्थनाया असामर्थ्यम् । अपरे च अनभ्यर्थिता अपि स्वयमेव एतदधिगमाय प्रवर्तन्ते इति तत्रापि एवमभ्यर्थनाया वैयर्थ्यम् । तदाह 'द्वेषकलङ्कहानियाच्ञा' इति । आयातशक्तिपाताश्च कीदृशाः ? इत्याह गलितमलाः इति, गलितं मलम् – अज्ञानं येषां ते तथाविधाः, अत एव च परम् आदिमम् अनुत्तरम् अवरम् अन्त्यं विसर्गं च ये जानते ते पराहंपरामर्शात्मकमन्त्रवी-

---

पं० ९ ग० पु० प्रविचारणे धियस्तदिति च पाठः ।

Indira Gandhi National Centre for the Arts

र्यज्ञाः इत्यर्थः, अत एव शिवसद्भावमयाः—परप्रमात्रेकात्मज्ञानशालिनः इति यावत्, अत एव च गुरवः—तात्त्विकार्थोपदेशिनः इति—एतदधिगमाय त एव परमधिकारिणः इत्युक्तं यतः प्रविचारणेऽधिक्रियन्ते इति, यद्वक्ष्यति

'गुरोर्लक्षणमेतावदादिमान्त्यं च वेदयेत् ।
पूज्यः सोऽहमिव ज्ञानी भैरवो देवतात्मकः ॥'

इति ॥३३३॥

इह आह्निकादाह्निकान्तरस्य संचयन्यायेन परस्परमनुस्यूततां दर्शयितुम् एकेनैव श्लोकेन तत्पर्यन्तप्रारम्भयोरुपसंहारोपक्रमौ करोति, इति 'अस्य ग्रन्थकारस्य शैली'—इति श्लोकस्य प्रथमार्धेन आह्निकार्थमुपसंहरति

तन्त्रालोकेऽभिनवरचिते-
ऽमुत्र विज्ञानसत्ता-
भेदोद्गारप्रकटनपटा-
वाह्निकेऽस्मिन्समाप्तिः ।

पं० ३ क० पु० अधिगमाय अत एव परमाधिकारिण इति पाठः ।
पं० ६ ग० पु० आद्यमन्त्यं चेति पाठः ।

Indira Gandhi National Centre for the Arts

पटौ इति पाक्तिकः पुंवद्भावः । इति शिवम् ॥

श्रीशृङ्गाररथादवाप्य कृतिनो जन्मानवद्यक्रमं
श्रीमच्छङ्खधरात्परं परिचयं विद्यासु सर्वास्वपि ।
श्रीकल्याणतनोः शिवादधिगमं सर्वागमानामपि
व्याख्यातं प्रथमाह्निकं जयरथेनात्रावधेयं बुधैः ॥

इति श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तविरचिते तन्त्रालोके
श्रीमद्राजानकजयरथकृतप्रकाशाभिख्यव्याख्योपेते विज्ञान-
भेदप्रकाशनं नाम प्रथममाह्निकं समाप्तिमगमत् ॥

एतत्कश्मीरभूपालसंश्रितेन प्रकाशितम् ।
सता मुकुन्दरामेण सन्मुदे स्ताच्छिवेर्पितम् ॥

श्रीशिवार्पणमस्तु ॥

Indira Gandhi National Centre for the Arts

अथ

श्रीतन्त्रालोकस्य

श्रीमन्महामाहेश्वराचार्याभिनवगुप्तपादविरचितस्य
श्रीमदाचार्यजयरथकृतप्रकाशाख्यव्याख्योपेतस्य

द्वितीयमाह्निकम्

जयतान्नतजनजयकृत्सजयो रुद्रो विनाभ्युपायं यः ।
पूरयति कं न कामं कामं कामेश्वरत्वेन ॥१॥

इदानीं

'यो हि यस्माद् गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते ।'

इति-स्थित्या आणवादीनां यथायथमुत्कर्षादिह पूर्व-पूर्वमेवाभिधानमिष्यते इत्युपेयैकरूपत्वेन शांभवा-

---

पं० २ क० ख० पु० कः पूरयति किं न कामं कामं वागीश्वरत्वेनेति पाठः ।
पं० ६ क० पु० अभिधानं करिष्यते इति इत्युपायैकेति च पाठः ।

Indira Gandhi National Centre for the Arts

दप्यनुपायस्योत्कृष्टत्वम्, इति—प्रथमं तत्स्वरूपमेवाभिधातुमाह्निकान्तरारम्भं द्वितीयार्धेन प्रतिजानीते

यत्तत्राद्यं पदमविरतानुत्तरज्ञप्तिरूपं
तन्निर्णेतुं प्रकरणमिदमारभेऽहं द्वितीयम् ॥१॥

तन्निर्णयमेवाह

अनुपायं हि यद्रूपं
कोऽर्थो देशनयात्र वै ।
सकृत्स्याद्देशना पश्चा-
दनुपायत्वमुच्यते ॥२॥

वै-शब्दोऽवधारणे, तेन नैव कश्चिदर्थः इत्यर्थः । अत्रैव समाधत्ते 'सकृत्स्यात्' इत्यादिना, देशना इत्युपलक्षणं—तेन सिद्धदर्शनाद्यपि ग्राह्यं, यदुक्तम्

'सिद्धानां योगिनीनां च दर्शनं चरुभोजनम् ।
कथनं संक्रमः शास्त्रे साधनं गुरुसेवनम् ॥
इत्याद्यो निरुपायस्य संक्षेपोऽयं वरानने ।'

इति । सकृदिति—न पुनरुपायानुभवः पौनःपुन्येनेत्यर्थः । अत एवाह 'पश्चादनुपायत्वमुच्यते' इति,

---

पं० ३ क० पु० यत्र त्वाद्यं परमशिवतानुत्तरेति, ख० पु० यत्त्वत्राद्यमिति पाठः ।
पं० ४ क० ख० पु० मिदं त्वारभेयं द्वितीयमिति पाठः ।

Indira Gandhi National Centre for the Arts

आणवादौ असकृद्भाव्यमानो हि देशनादि उपेयप्राप्तिं विदधाति इति तत्र तथात्वमुक्तम्, इह तु न तथा इत्यनुपायत्वं, पर्युदासस्य 'अनुदरा कन्या' इति वदल्पार्थत्वेऽपि भावात् अल्पोपायत्वमित्यर्थः— प्राप्तव्ये हि प्राप्ते किं नाम निरर्थकैरायासकारिभिर्भावनादिभिरिति भावः, यदुक्तम्

'उपायैर्न शिवो भाति भान्ति ते तत्प्रसादतः ।
स एवाहं स्वप्रकाशो भासे विश्वस्वरूपकः ॥
इत्याकर्ण्य गुरोर्वाक्यं सकृत्केचन निश्चिताः ।
विना भूयोऽनुसंधानं भान्ति संविन्मयाः स्थिताः ॥'

इति ॥ २ ॥

नन्वत्र प्रसज्यप्रतिषेधपक्षावलम्बनेनाविद्यमानोपायत्वमेव, इति मुख्योऽर्थः कस्मान्न व्याख्यातः ? इत्याशंक्याह

अनुपायमिदं तत्त्व-
　मित्युपायं विना कुतः ।
स्वयं तु तेषां तत्तादृक्
　किं ब्रूमः किल तान्प्रति ॥३॥

पं० १२ क० पु० नेन विद्यमानोपायमेवेति पाठः ।

Indira Gandhi National Centre for the Arts

'इदमनुपायं तत्त्वम्' इत्याद्युपदेशादिना केनचिदुपायेनावश्यं भाव्यम्, अन्यथा लक्षणमुपायमन्तरेण कथं सिध्येत्, इत्युक्तम् 'इत्युपायं विना कुतः' तेन सकृदुपदेशादिना केनचिदुपायेनावश्यं भाव्यम्, अन्यथा ह्यनुपायपरतत्त्वज्ञप्तिरेव न स्यात् । ननु स्वविमर्शबलात्स्वयमेव प्राप्तप्राप्तव्या अपि केचिद् दृश्यन्ते, इति—किं सकृदुपदेशाद्यात्मना स्वल्पेनाव्युत्पन्नेन ? इत्याशंक्याह 'स्वयमित्यादिना' तदित्यनुपायं परप्रकाशात्मकं रूपं, किं ब्रूम इति—नहि तदधिकारेण शास्त्रस्यैव प्रवृत्तिर्भवेदिति भावः, तदुक्तम्

'तत्त्वज्ञस्य तृणं शास्त्रं......... ।'

इति । यदभिप्रायेणैव

'संसाराम्बुनिधिं यः स्यात्तितीर्षुः कश्चिदुत्तमः'
नात्यन्ततज्ज्ञो नो मूर्खः सोऽस्मिञ्छास्त्रेऽधिकारवान्' ।

इत्यादावत्यन्ततज्ज्ञस्य शास्त्रे नाधिकार उक्तः, तेन वयमर्वाग्दर्शिनोऽप्यदृष्टेऽर्थे शास्त्रैकदिव्यचक्षुष आरु-

---

पं० २ ग० पु० उपायान्तरेण कथमिति पाठः ।
पं० ८ ग० पु० अव्युत्पन्नत्वेन इति पाठः ।
पं० १४ संसारेति पदद्वयं ग० पुस्तकात्पूरितमस्ति ।

Indira Gandhi National Centre for the Arts

रुच्नूनायातशक्तिपातान्प्रत्येव किंचन ब्रूमः—तेषां ह्येवमुपायमन्तरेण न कदाचिदप्युपेयप्राप्तिर्भवेत् इत्येवमुक्तम्, यद्वक्ष्यति

'नानिर्मलचितः पुंसोऽनुग्रहस्त्वनुपायकः ।'

इति ॥ ३ ॥

ननु यद्येवं तर्हि अल्प एव कश्चिदुपायांशः समुपदिश्यतां येनोपदेश्यजनस्य सुखमेव उपेयप्राप्तिः स्यात्, किं बह्वायासदायिभिरन्यैरुपायैः? इत्याशंक्याह

यच्चतुर्धोदितं रूपं
　　विज्ञानस्य विभोरसौ ।
स्वभाव एव मन्तव्यः
　　स हि नित्योदितो विभुः ॥४॥

यच्चतुर्धा—अनुपायादिभेदेन विज्ञानस्य रूपमुक्तं तद्विभोः परमेश्वरस्यैव स्वातन्त्र्यं ज्ञेयम्, स एव हि स्वस्वातन्त्र्यादतिनिर्ह्रासतारतम्यादियोगाद्विचित्रेणोपदेश्यजनात्मना प्रस्फुरन् तदनुसारमेव तत्तदुपाय-

पं० ६ क० ख० पु० समुद्दिश्यतामिति पाठः ।

पं० १२ ग७ पु० स हि संविन्मयः प्रभुरिति पाठः ।

पं० १५ क० पु० स्वातन्त्र्यात्तारतम्येति पाठः ।

Indira Gandhi National
Centre for the Arts

वैचित्र्यमप्याभासयेत् । नन्वेक एव विचित्रेण रूपेण च स्फुरति, इति किमेतत् ? इत्याशंक्याह 'स हीत्यादि' नित्योदित इति — अप्रच्युतप्राच्यस्वरूपः, अत एव 'विभुः' व्यापकः — तत्तद्वैचित्र्यग्रहणकालेऽप्यनुगत एवेत्यर्थः ॥ ४ ॥

अत एवाह

एतावद्भिरसंख्यातैः
स्वभावैर्यत्प्रकाशते ।
केऽप्यंशांशिकया तेन
विशन्त्यन्ये निरंशतः ॥ ५ ॥

एतावद्भिरिति — चतुर्भिः, असंख्यातैरिति — तत्तदवान्तरभेदात्, तेनेति — अनेकेन स्वभावेन प्रकाशनात् ॥५॥

न केवलमत्रैयदेव वैचित्र्यं यावदन्यदप्यस्तीत्याह

तत्रापि चाभ्युपायादि-
सापेक्षान्यत्वयोगतः ।
उपायस्यापि नो वार्या
तदन्यत्वाद्विचित्रता ॥ ६ ॥

पं० १४ क० पु० सापेक्षत्वान्ययोगत इति पाठः ।

Indira Gandhi National Centre for the Arts

उपायस्यापीति अपिशब्दो भिन्नक्रमः, तेन नो वार्या तदन्यत्वादपि, इति व्याख्येयम्, एतच्च प्रथमाह्निक एव वितत्य निर्णीतम्, इति — नेह पुनरायस्तम् ॥६॥

एवमेतत् प्रसंगादभिधाय प्रकृतमेवाह

तत्र ये निर्मलात्मानो
भैरवीयां स्वसंविदम् ।
निरुपायामुपासीना-
स्तद्विधिः प्रणिगद्यते ॥७॥

ये केचन तीव्रतीव्रशक्तिपातानुविद्धा विकल्पकलंकान्मुक्ताः, भैरवीयां पूर्णाम्, अत एवानुपायाम् — अनपेक्षाम्, आत्मसंविदमाविष्टाः, तेषां विधिः — पूर्णसंविदावेशक्रमात्मा प्रकारः, प्रकर्षेण निगद्यते — युक्तियुक्तत्वेन भण्यते इत्यर्थः ॥ ७ ॥

तदेवाह

तत्र तावत्क्रियायोगो
नाभ्युपायत्वमर्हति ।

पं० ६ क० पु० शक्तिपातविकल्पान्मुक्ता इति पाठः ।

पं० १२ क० पु० आवेशात्मप्रकार इति पाठः ।

Indira Gandhi National Centre for the Arts

उपायः खलु करणे प्रसृते, अतश्च पूर्णेन भाव्यमेव, इति सर्वेषामविवादः, न चात्रैवं – क्रियादयो हि संवेद्यमानत्वात्संविन्निष्ठा एव, इति संविच्छक्तिं विना अप्रसिद्धत्वात् कथं तत्रोपायतामासादयेयुः, अतः प्रत्युत क्रियादीनां बहिराभासने संविदुपायः, इति युक्तम् ॥ अत एवाह

स हि तस्मात्समुद्भूतः
प्रत्युत प्रविभाव्यते ॥८॥

तस्मादित्यनुपायात्संवित्तत्त्वात् ॥८॥

अथ यद्यस्य क्रियादि न कारकम् अपि तु ज्ञापकम् इति उच्यते, तदपि न युज्यते, इत्याह।

ज्ञप्तावुपाय एव स्या-
दिति चेज्ज्ञप्तिरुच्यते।
प्रकाशत्वं स्वप्रकाशे
तच्च तत्रान्यतः कथम् ॥९॥

इह जडस्तावत् स्वयमप्रकाशात्मा स्वात्मनो न

पं० ३ क० पु० एवेति संविदः प्रसिद्धत्वात्कथमिति पाठः।

Indira Gandhi National Centre for the Arts

प्रकाशते, अपि तु परस्य, इति — पर एवास्य प्रकाशः, अजडस्तु स्वयं प्रकाशात्मा स्वात्मन एव प्रकाशते, न परस्य, इति — न परोऽस्य प्रकाशोऽपितु स्व एव अस्य प्रकाशः, तस्यापि परप्रकाशत्वे ह्यप्रकाशात्मत्वात् जाड्यं स्यात्, अत एवाह 'स्वप्रकाशे तच्च तत्रान्यतः कथम्' इति प्रकाशत्वम्, एवं चान्योऽपि स्वप्रकाशो वा स्यात् अन्यथा वा, स्वप्रकाशत्वे प्रथमस्यैव तथाभाव उच्यताम्, अनेनापि कोऽर्थः, अन्यथात्वे तस्यापि जाड्यापत्तिः, इति प्रकाशत्वात्तत्प्रकाशनाय प्रमात्रन्तरापेक्षायामनवस्थापत्तिः, इति सर्वेषामेव अप्रकाशात्मत्वान्न किंचिदपि प्रकाशेत, इति — सर्वमिदमन्धं स्यात् ॥९॥

तदाह

संवित्तत्त्वं स्वप्रकाश-
　मित्यस्मिन्किं नु युक्तिभिः ।

पं० २ ख० पु० अजडस्तद्द्वयं प्रकाशेति पाठः ।
पं० ७ क० पु० स्वप्रकाशकः स्यादिति पाठः ।
पं० ८ क० पु० तथा उत्पद्यतामिति ख० पु० भाव उच्यतामिति पाठः ।

Indira Gandhi National
Centre for the Arts

तदभावे भवेद्विश्वं
जडत्वादप्रकाशकम् ॥१०॥

किं नु युक्तिभिरिति—बह्वीभिर्युक्तिभिर्न किंचित्प्रयोजनमित्याह, एकैव हि युक्तिरियं सर्वातिशायिनी—यत्संविदः स्वप्रकाशत्वं यदि न स्यात्, न किंचिदपि प्रकाशेत इति ॥१०॥

ननु यदि नाम अत्र न बाह्यः क्रियादिः प्रगल्भते तदा गुरुज्ञानादि उपायतां भजताम्? इत्याशंक्याह

यावानुपायो बाह्यः स्या-
दान्तरो वापि कश्चन ।
स सर्वस्तन्मुखप्रेक्षी
तत्रोपायत्वभाक्कथम् ॥११॥

यावानिति—नानाशास्त्रोपदिष्टः, सर्व इति—बाह्य आन्तरो वा, तन्मुखप्रेक्षीति—संविदधीनसिद्धिरित्यर्थः, यदपेक्ष्य हि यस्य सिद्धिरेवं भवति स कथं तस्य उपायतां यायादिति भावः ॥११॥

पं० १६ क० घ० पु० यदपेक्षा हि यस्य सिद्धिरेव भवेत्स कथमिति पाठः।

Indira Gandhi National Centre for the Arts

अत एवाह

त्यजावधानानि ननु क्व नाम
धत्सेऽवधानं विचिनु स्वयं तत् ।
पूर्णोऽवधानं न हि नाम युक्तं
नापूर्णमभ्येति च सत्यभावम् ॥१२॥

इह उपदिश्यमानेन स्वयमेव तावदवधातव्यम् इति परामर्शनीयम्, किं पूर्णे रूपे उतापूर्णे ? तत्र तावत्पूर्णे रूपेऽवधानं न युक्तम्, अवधानं खलु—प्रतिनियतावधेयविषयनिष्ठम् ऐकाग्र्यम्, अतश्च भेदप्रधानं न किंचित्फलमादातुं समर्थम् ॥१२॥

तस्मादसामर्थ्यवैयर्थ्योपहतत्वादवधानस्यापि यत्र नास्ति उपायभावस्तत्र का वार्ता तदनुप्राणित-तस्य भावनादेः ? इत्याह

तेनावधानप्राणस्य
भावनादेः परे पथि ।
भैरवीये कथंकारं
भवेत्साक्षादुपायता ॥१३॥

पं० ३ ख० पु० धर्मेऽवधानमिति पाठः ।

पं० ८ क० पु० अवधानं खलु अप्रतिनियतेति पाठः ।

Indira Gandhi National Centre for the Arts

भैरवीये इति—पूर्णो ॥१३॥

ये पुनरनेनापि उपायेनानुपायं परं तत्त्वमनुसरन्ति तान्प्रति किमुच्यते ? इत्याह

येऽपि साक्षादुपायेन
तद्रूपं प्रविविक्षते ।
नूनं ते सूर्यसंवित्त्यै
खद्योताधित्सवो जडाः ॥१४॥

तदुक्तम्

'अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते ।
यैरुपायाः प्रतन्यन्ते नूनं त्वां न विदन्ति ते ॥'

इति ॥ १४ ॥

अत्रैव निमित्तान्तरमप्याह

किं च यावदिदं बाह्य-
मान्तरोपायसंमतम् ।
तत्प्रकाशात्मतामात्रं
शिवस्यैव निजं वपुः ॥१५॥

पं० २ क० पु० तत्त्वमनुविशन्तीति पाठः ।
पं० ७ क० पु० खद्योतं लिप्सव इति पाठः ।
पं० ९ क० पु० प्रकटोदिते इति पाठः ।
पं० १६ क० पु० परं वपुः इति पाठः ।

Indira Gandhi National Centre for the Arts

इह खलु यत्किंचन उपायत्वेनाभीष्टं तदप्रकाशमानं प्रकाशमानं वा ? अप्रकाशमानं चेत् तस्य न किंचिदपि रूपं स्यात्, इति किं नाम उपायतां भजतां, प्रकाशमानं चेत् प्रकाशात्मा शिव एवावस्थितः, नहि तदतिरिक्तमन्यत्किंचिदुपपद्यते, इति—कस्योपायभावः, उपायेन हि उपेयाद्व्यतिरिक्तेन भाव्यं, तच्चात्र न युक्तम्, इति को नाम उपायोपेयभावार्थः ॥ १५ ॥

न केवलं भावनाद्येव उपायत्वेनाभीष्टमेवम्, यावदन्यदपीत्याह

नीलं पीतं सुखमिति
　　प्रकाशः केवलः शिवः ।
अमुष्मिन्परमाद्वैते
　　प्रकाशात्मनि कोऽपरः ॥१६॥
उपायोपेयभावः स्या-
　　त्प्रकाशः केवलं हि सः ॥१७॥

भावनादेः सुप्रसिद्धेऽपि उपायत्वे निरस्ते अन्यस्य

पं० १७ क० पु० उपायत्वेन निरस्ते अन्यत्र इति पाठः ।

Indira Gandhi National
Centre for the Arts

कस्यचित्संभावनामात्रमपि माभूत्, इत्येवमुक्तं 'कोऽपर' इति, यत्र उपायत्वसंभावनापि स्यात् ॥१७॥

ननु यद्येवं तर्हि सर्वत्र प्रसिद्धोऽयं द्वैतव्यवहारः कथमपह्नूयते? इत्याशङ्क्याह

इदं द्वैतमयं भेद
इदमद्वैतमित्यपि।
प्रकाशवपुरेवायं
भासते परमेश्वरः ॥१८॥

द्वैतव्यवहारोऽपि प्रकाशमानत्वात्प्रकाशात्मैवेत्यभिप्रायः, एतच्च बहूनां वादिनां मतम्—इति द्योतयितुम् 'अयं भेद' इति पुनरुपादानम्, यथा चाद्वैतप्रतिभासे प्रकाशात्मा परमेश्वर एक एव प्रतिभासते तथा द्वैतप्रतिभासेऽपि, इत्यर्थमौपम्यं कटाक्षयितुम् 'इदमद्वैतमित्यपि' इत्युपात्तम् ॥१८॥

ननु बाह्योऽर्थः प्रकाशमानत्वात्प्रकाशात्मैव इत्यास्ताम्, अन्योन्यं पुनरस्य भेदे किमायातम्, इत्यापतितमेव द्वैतम्? इत्याशङ्क्याह

पं० १३ क० पु० इत्युक्तमौपम्यमिति पाठः।
पं० १६ क० पु० किमिदमापतितमिति पाठः।

Indira Gandhi National Centre for the Arts

अस्यां भूमौ सुखं दुःखं
बन्धो मोक्षश्चितिर्जडः ।
घटकुम्भवदेकार्थाः
शब्दास्तेऽप्येकमेव च ॥१९॥

अस्यां भूमाविति—परमाद्वयदशायामित्यर्थः, 'एकार्था' इति—एकः प्रकाश एवार्थोऽभिधेयो येषां ते तथा, सुखदुःखादीनां हि प्रकाशातिरेकेण प्रातिस्विकं नियतं किंचन रूपं यदि स्यात् तदैवं संभावनापि भवेदिति भावः, अत एव

'घटो मदात्मना वेत्ति वेद्म्यहं च घटात्मना ।'

इत्यादिरन्यैरुक्तम् । ननु यद्येवं तर्हि तदभिधायकत्वशब्दाभिप्रायेणापि द्वैतं स्यात् ? इत्याह 'शब्दास्तेऽप्येकमेव च' इति, एकमिति—संवेद्यमानत्वात्संवेदनमेवेत्यर्थः ॥१९॥

ननु यदि नीलसुखादि प्रकाशमानत्वात्प्रकाश एव तर्हि तत्केन रूपेण प्रकाशते ? इत्याशंक्याह

पं० ६ क० पु० प्रकाशरूपोऽर्थोऽभिधेय इति पाठः ।

पं० ७ क० पु० प्रकाशव्यतिरेकेणेति पाठः ।

पं० १५ क० पु० नीलप्रकाशादि इति पाठः ।

Indira Gandhi National Centre for the Arts

प्रकाशे ह्यप्रकाशांशः
कथं नाम प्रकाशताम् ।
प्रकाशमाने तस्मिन्वा
तद्द्वैतास्तस्य लोपिताः ॥२०॥
अप्रकाशेऽथ तस्मिन्वा
वस्तुता कथमुच्यते ॥
न प्रकाशविशेषत्व-
मत एवोपपद्यते ॥२१॥

अप्रकाशांश इति—सुखादिजडोऽर्थः, कथं नामेति—केन रूपेणेत्यर्थः, तत्र यदि प्रकाशात्मनैव प्रकाशते तत्तस्य नीलसुखादेः स्वभावस्य दोषः स्यात्—नियतेन नीलत्वादिना बाह्येन रूपेण न भायात्प्रकाश एव शिष्येत इति यावत्, अथ अप्रकाशात्मना नियतेनैव रूपेण प्रकाशते तत्तस्य सत्तानिश्चय एव न भवेत्, नहि प्रकाशमन्तरेण नीलादीनां कदाचिदपि स्वरूपं दृष्टम्, 'अप्रकाशात्मना रूपेण प्रकाशते' इति वाचोयुक्तिश्च रिक्ता स्यात्, तदाह 'अप्रकाश' इत्यादि

पं० ४ ख० पु० तत्र लोपत इति पाठः ।

पं० १६ ग० पु० अप्रथात्मरूपेणेति पाठः ।

Indira Gandhi National Centre for the Arts

प्रकाशः पुनर्नीलादिपरिहारेणानीलादावपि प्रकाशते, नीलादिर्हि उपाधिः, स च स्वस्वातन्त्र्यविजृम्भामात्ररूपत्वान्न वास्तवः, इत्यखण्ड एक एव प्रकाश उज्जृम्भते, यन्महिम्नैव इदं तत्तन्नीलाद्याभासात्म विश्वं स्फुरेत्, अत एवाह 'न प्रकाशविशेषत्वमुपपद्यते' इति, अत इति—एकस्यैव अखण्डस्य प्रकाशस्य तत्तदाभासात्मना स्फुरणात्। ननु 'नीलप्रकाशोऽन्यः, पीतप्रकाशश्चान्य' इत्यादिरस्त्येव एषां भेदः, इति किमुक्तं 'न प्रकाशविशेषत्वमुपपद्यते' इति? नैतत्—औपाधिको ह्ययं भेदः, स च न वास्तवः—इत्युपपादितं बहुशः, नीलादयो हि प्रकाशत्वात्प्रकाशात्मका एव इति किं केन भेद्यम्, नहि स्वात्मनैव स्वात्मा भिद्यते इत्येतदुक्तम् 'न च प्रकाशैकरूपायां संविदि संविदन्तरमस्ति' एवं हि स्वरूपभेदकृते भेदव्यवहारे क्रियमाणे एकभेद-

---

पं० ४ क० पु० महिम्ना तत्तन्नीलानीलाभास इति पाठः ।
पं० १० क० पु० स एव वास्तव इति पाठः ।
पं० १२ क० पु० भेद्यते इत्येतद्युक्तमिति पाठः ।
पं० १३ क० पु० अस्ति ते एवमिति पाठः ।
पं० १४ क० पु० भेदवते इति पाठः ।

Indira Gandhi National Centre for the Arts

प्रकाशरूपत्वमेवोक्तं भवेत् इति गजस्नानतुल्यत्वं स्यात्, ततश्च पुनरपि 'एकैवाखण्डवित्' इत्येव पर्यवस्येत्, एवं च देशकालावपि प्रकाशदशामेवाधिशयानौ प्रकाश्यत्वात्प्रकाशैकात्म्यमेवावगाहमानौ कथंकारं प्रकाशस्य भेदाधायकौ स्याताम्, प्रकाशातिरेकाभ्युपगमे वा अनयोरत्र नित्यत्वव्यापकत्वाभ्यां भेदाधानेऽसामर्थ्यम्, इत्येक एवाखण्डः प्रकाशः, इति — मतान्तरसिद्धिमभिवाञ्छन्तः परे परं निरस्ताः ॥२१॥

तदाह

अत एकप्रकाशोऽय-
मिति वादेऽत्र सुस्थिते ।
दूरादावारिताः सत्यं
विभिन्नज्ञानवादिनः ॥२२॥

ननु यदि ज्ञानानि विभिन्नानि न संभवन्ति, तत् एकशब्दः किमपोहनायात्र प्रयुक्तः ? इत्याशंक्याह

पं० ६ क० पु० नित्यव्यापकाभ्यां भेदादावसामर्थ्यमिति पाठः ।
पं० ७ क० पु० इति सत्यानन्तरसिद्धिमिच्छन्तः परमिति पाठः ।

Indira Gandhi National Centre for the Arts

प्रकाशमात्रमुदित-
मप्रकाशनिषेधनात् ।
एकशब्दस्य न त्वर्थः
संख्या चिद्व्यक्तिभेदभाक् ॥२३॥

अप्रकाशः — प्रकाश्यो नीलादिर्बाह्योऽर्थस्तावन्निषिद्धः, अतः 'प्रकाशः केवलोऽस्ति' इत्येकशब्दस्यात्रासहायाद्वृत्तिः, तदुक्तं 'एकशब्दस्यार्थः प्रकाशमात्रमुदितम्' इति, न पुनः प्रकाशभेदभाक् इत्येकद्वित्र्यादिलक्षणः संख्यार्थो, येन — मतान्तराण्यप्यपोह्यतया संभावनीयानि स्युः ॥२३॥

अत एवात्र भेदागूरकं व्यवहारमात्रमपि न ज्ञायते, इत्याह

नैष शक्तिर्महादेवी
न परत्राश्रितो यतः ।

पं० ३ क० पु० नन्वर्थ इति पाठः ।

पं० ६ क० पु० एकशब्दस्यासहाया वृत्तिरिति पाठः ।

पं० ७ ख० पु० शब्दस्यार्थः प्रकाशमानं तदितरदितरदिति न पुनरिति पाठः ।

पं० ८ क० पु० एकद्वित्वादिलक्षणसत्तानन्तराख्यान्यापोहतयेति पाठः ।

Indira Gandhi National Centre for the Arts

न चैष शक्तिमान्देवो
न कस्याप्याश्रयो यतः ॥२४॥
नैष ध्येयो ध्यात्रभावा-
न्न ध्याता ध्येयवर्जनात् ।
न पूज्यः पूजकाभावा-
त्पूज्याभावान्न पूजकः ॥२५॥
न मन्त्रो न च मन्त्र्योऽसौ
न च मन्त्रयिता प्रभुः ।
न दीक्षा दीक्षको वापि
न दीक्षावान्महेश्वरः ॥२६॥

एष इति—व्याख्यातस्वरूपः परः प्रकाशः, शक्ति-शक्तिमदादयो हि शब्दाः संबन्धिशब्दत्वान्नित्यसापेक्षाः इत्यन्यागूरणमन्तरेण स्वार्थ एव विश्रान्तिं लभन्ते, इति तैः क्रियमाणो व्यवहारो भेदनिष्ठ एव स्यात्, न चात्र परप्रमात्रेकात्मनि प्रकाशे भेदः कश्चिदस्ति, इत्येवं—व्यवहारमात्रतां कदाचिदपि स

पं० ४ क० पु० न पूजा पूजकेति पाठः ।

Indira Gandhi National Centre for the Arts

न यायात्, अतश्च नायं शक्तिः, सा हि परं शक्तिमन्तमाश्रित्यैव वर्तते इत्यनपेक्षत्वाद्भेदाविर्भावे प्रकाश एवैकः, इति प्रतिज्ञाया हानिः स्यात्, एवं शक्तिमच्छब्दव्यवहारोऽपि नायं, सोऽपि हि परं शक्तिलक्षणमर्थमुररीकृत्यैव वर्तते, इति भेद एवापतेत्, एवं ध्येयादावपि ज्ञेयं, मन्त्र इति मन्त्रस्य प्रणवादेर्वाच्यः, मन्त्रयिता मन्त्राणां पाठकः, न दीक्षेति कर्तृकर्मापेक्षित्वात्, अत्र च माहेश्वर्ये प्रभुत्वं हेतुः ॥ २४–२५–२६ ॥

अत एव यत्किंचन भेदाधायकं तदत्र नास्ति, इत्याह

स्थानासननिरोधार्घ-
संधानावाहनादिकम् ।
विसर्जनान्तं नास्त्यत्र
कर्तृकर्मक्रियोज्झिते ॥२७॥

पं० २ ग० पु० इत्यनाक्षेपादिति पाठः ।
पं० ४ क० ख० पु० सोऽपि स्वशक्तिलक्षणमुररीकृत्य इति पाठः ।
पं० ६ ख० पु० मन्त्रस्य इति मन्त्रणस्येति पाठः ।

Indira Gandhi National Centre for the Arts

स्थानं—स्थापनमुद्रया भगवतोऽवस्थानम्, आसनं—संनिधानमुद्रया पूजां प्रति औन्मुख्यं, निरोधः—तत्रैवाविचलत्त्वेनावस्थानम्, अर्घोऽष्टाङ्गः, संधानं मन्त्रादिविषयम्, आवाहनं—अनभिमुखस्याभिमुखीकरणं, विसर्जनम् — अभिमुखीभूतस्यानभिमुखीकरणम्, एषामावाहनादिविसर्जनान्तानामसत्त्वे हेतुगर्भं विशेषणं—'कर्तृ इत्यादि' कर्त्रादीनां हि विकल्पैकपरमार्थत्वात्, प्रकाशस्य च परप्रमात्रेकात्मकत्वेनाविकल्प्यत्वात् न केनचिदपि व्यपदेशेन व्यपदेष्टुं शक्यते, इति 'नैष शक्तिः' इत्याद्युक्तम् ॥२७॥

न चैतद्युक्तिमात्रशरणम्, अपि त्वागमेनापि सिद्धम्, इति श्रीभर्गशिखां संवादयति ।

न सन्न चासत्सदस-
न्न च तन्नोभयोज्झितम् ।
दुर्विज्ञेया हि सावस्था
किमप्येतदनुत्तरम् ॥२८॥

पं० २ ख० पु० पूज्यं प्रति इति पाठः ।

पं० ७ ख० पु० कर्त्रादयो हि इति पाठः, तदनुसारेण शक्यन्ते इति च समुचितः प्रतिभाति ।

Indira Gandhi National Centre for the Arts

अयमित्यवभासो हि
　　यो भावोऽवच्छिदात्मकः ।
स एव घटवल्लोके
　　संस्तथा नैष भैरवः ॥२९॥

लोके हि सजातीयव्यावृत्तौ यः कश्चिदर्थः 'अयमिति' पुरोवर्तित्वेनावभासते भावः, स एव 'सत्' इत्यभिधीयते, यथा — घट इति, समनन्तरव्याख्यातस्वरूपः प्रकाशः पुनरनन्तभावनिर्भरो न तथा— महासत्तात्मत्वेनानवच्छिन्नत्वात् नैवंरूपः — सच्छब्दव्यवहार्यो न भवति, इति यावत् ॥२८-२९॥

एवं तर्ह्यसच्छब्दव्यवहार्यो भवेत् ? इत्याशंक्याह

असत्त्वं चाप्रकाशत्वं
　　न कुत्राप्युपयोगिता ।

प्रकाश एव सर्वभावानां परा सत्ता इत्यसत्त्वं नामाप्रकाशत्वमकिंचिद्रूपत्वमुच्यते, यथा — शशवि-

---

पं० २ क० पु० यो भावो वा चिदात्मक इति पाठः ।
पं० ४ क० पु० व्यावृत्ततायाः कश्चनार्थ इति पाठः ।
पं० ८ क० ख० पु० पुनरन्तर्भावेति पाठः ।
पं० ९ क० पु० महासत्तात्मत्वान्नैवमिति पाठः ।
पं० १२ ग० पु० असत्यं चाप्रकाशस्येति पाठः ।

Indira Gandhi National Centre for the Arts

षाणादेः, अत एव च तन्न कुत्रापि कस्यांचिदपि अर्थक्रियायामुपयुक्तम् — न कांचिदप्यर्थक्रियां करोति, इति यावत् ॥

प्रकाशः पुनर्न तथा इत्याह

विश्वस्य जीवितं सत्यं
प्रकाशैकात्मकश्च सः ॥३०॥

विश्वस्य — चेतनाचेतनात्मनः सर्वस्य, पारमार्थिकं जीवितं — स्फुरत्तात्मकत्वेन अनुप्राणकं, नहि तेन विना किंचिदपीदं प्रकाशते, इत्युक्तम् 'प्रकाशैकात्मकश्च' इति — एवमनेकरूपत्वादसच्छब्दव्यवहार्योऽपि, न भवेदिति भावः ॥३०॥

अत एव सदसदात्मापि न, इत्याह

आभ्यामेव तु हेतुभ्यां
न द्वयात्मा न द्वयोज्झितः ।
सर्वात्मना हि भात्येष
केन रूपेण मन्त्र्यताम् ॥३१॥

आभ्यां — समनन्तरोक्ताभ्यामनवच्छिन्नत्वप्रका-

Indira Gandhi National Centre for the Arts

शमानत्वलक्षणाभ्याम्, ननु यद्येवं तर्हि सदसदात्मकरूपद्वयोत्तीर्णः स्यात्? इत्याशंक्याह 'न द्वयेत्यादि' भावाभावावभासकालेऽपि स एव हि परमवभासते, इति कथं सदसद्भ्यामप्युज्झितः स्यात्? अत आह 'सर्वात्मना हि भात्येष' इति,—एवमेतत्परप्रमात्रेकात्म भवत्येव अन्यथा ह्यनवच्छिन्नरूपत्वात्कदाचिदपि विकल्पतां न यायात् इति तात्पर्यार्थः, यदुक्तम्

'सतोऽवश्यं परमसत्सच्च तस्मात्परं विभो ।
त्वं चासतः सतश्चान्यस्तेनासि सदसन्मयः ॥'

इति । तथा

'न शान्तमुदितं वापि तव रूपं न मध्यमम् ।
रूपं रूपं तव हरे यन्न केनचिदुच्यते ॥'

इति, अतश्च केन तावत्कल्पितेन रूपेण एतदुच्यते इति न जानीमः, इयं हि दशा विकल्पोपहतबुद्धीनां मायाप्रमातॄणां दुर्विज्ञेया—यथोक्तयुक्त्या ज्ञातुमशक्यैवेत्यर्थः, साक्षात्कृतपरमात्मतत्त्वानामवि-

---

पं० ९ क० पु० परप्रमाणको भवतीति पाठः ।
पं० १४ क० पु० केन तावत्क्रियते केनेति पाठः ।

Indira Gandhi National
Centre for the Arts

कल्पवृत्तीनां पुनरेतत्स्वानुभूतिमात्ररूपपरानन्दचमत्कारघनत्वेन सर्वातिशायि भासते एव, इत्युक्तं 'किमप्येतदनुत्तरम्' इति ॥ ३१ ॥

न केवलमेतदत्रैवोक्तं यावदन्यत्रापि, इत्याह

श्रीमत्त्रिशिरसि प्रोक्तं
परज्ञानस्वरूपकम् ।
शक्त्या गर्भान्तर्वर्तिन्या
शक्तिगर्भं परं पदम् ॥३२॥

'परं ज्ञानं कथं देव' इति देवीप्रश्ननिर्णयार्थं ह्येतदत्र परज्ञानरूपं भगवतोक्तमित्याशयः, तदेव पठति 'शक्त्या' इत्यादि, यदेतत्परं पदं तच्छक्तिगर्भं, शक्तिरेव स्वातन्त्र्यविमर्शादिपदाभिधेया गर्भः सारं यस्य तत्, सा च न तदतिरेकिणी, इत्याह 'शक्त्या गर्भान्तर्वर्तिन्या' इति, यतस्तयैव स्वातन्त्र्याख्यया शक्त्या गर्भोऽन्तरं प्रमात्रैकात्म्यं तस्यान्तः परा काष्ठा तेन वर्तते तच्छीला—तया स्वस्वभावरूपयोपलक्षितमित्यर्थः, अन्यथा ह्यस्य परत्वमेव न स्यात्, यदुक्तम्

पं० ७ क० पु० गर्भान्तवासिन्या इति पाठः ।

Indira Gandhi National Centre for the Arts

'स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः ॥'

इति, अत एव शक्तौ स्वातन्त्र्यात्मनि स्वभाव एव तिष्ठति—सदैव ताद्रूप्येण वर्तत इत्यर्थः, अत एव शक्तिगर्भं—स्वातन्त्र्यशक्तिमन्तरेण नास्यान्याः शक्तयो विद्यन्ते इत्यर्थः, सैव हि तत्तदेषणीयाद्यर्थोपाधिवशान्नानात्वेन व्यवह्रियत इति भावः, यदुक्तम्

'तेन स्वातन्त्र्यशक्त्यैव युक्त इत्याञ्जसो विधिः ।
बहुशक्तित्वमप्यस्य तच्छक्त्यैवावियुक्तता ॥'

इति, तेन 'स्वतन्त्रो बोधः परमार्थः' इत्याद्युक्तनीत्यानवच्छिन्नस्वरूपः स्वातन्त्र्यशाल्यविकल्पकः प्रकाश एव परं तत्त्वम्, इति तात्पर्यम् ॥ ३२ ॥

अत एव च नियतव्यवच्छेदासहिष्णुत्वादेतद्विकल्प्यतां नैति, इत्याह

न भावो नाप्यभावो न
द्वयं वाचामगोचरात् ।
अकथ्यपदवीरूढं
शक्तिस्थं शक्तिवर्जितम् ॥ ३३ ॥

Indira Gandhi National
Centre for the Arts

अगोचरादिति भावप्रधानो निर्देशः, तेन वाचामगोचरत्वादकथ्यपदवीरूढमित्यर्थः। एतच्च सर्वमसकृत्त्वेनैव व्याख्यातम्, इति न पुनरायस्तम् ॥३३॥

ये चातोऽवहितास्त एव परं कृतकृत्याः, इत्याह

इति ये रूढसंवित्ति-
परमार्थपवित्रिताः ।
अनुत्तरपथे रूढा-
स्तेऽभ्युपायानियन्त्रिताः ॥ ३४ ॥

इति—उक्तेन गुरूपदेशादिना, रूढा—तदैकात्म्यलाभादापादितप्ररोहा, या संवित्तिः, तस्या यः परमार्थः—सर्वसर्वात्मत्वेन स्फुरणं, तेन पवित्रिताः—भेदविकारकालुष्यापनयनेन परमाद्वयपात्रतामापादिताः, अत एव ते व्यतिरिक्तेन बाह्येनाभ्यन्तरेण वाभ्युपायेन अनियन्त्रिताः—तन्निरपेक्षाः सन्तः, अनुत्तरपथे—पूर्णानन्दचमत्कारघनतया सर्वातिशायिनि चिद्विका-

पं० १२ क० पु० विकारकारककालुष्यापनयेनेति पाठः ।
पं० १३ क० पु० तेनाव्यतिरिक्तेनेति पाठः ।

Indira Gandhi National Centre for the Arts

सात्मवृत्तिमार्गे विश्रान्ताः — स्वरसावस्थानेनैव लब्धतत्सामरस्या इत्यर्थः, तदुक्तम्,

'यथा स्थितस्तथैवास्स्व मा गा बाह्यमथान्तरम् ।
केवलं चिद्विकासेन विकारनिकराञ्जहि ॥'

इति । तथा

'आनन्दशक्तिविश्रान्तो योगी समरसो भवेत् ।'

इति । तथा

'उपायो नापरः कश्चित्स्वसत्तावगमादृते ।
तामेवानुसरन्योगी स्वस्थो यः स सुखी भवेत् ॥'

इति ॥३४॥

ततश्च किम्? इत्याह

तेषामिदं समाभाति
सर्वतो भावमण्डलम् ।
पुरःस्थमेव संवित्ति-
भैरवाग्निविलापितम् ॥३५॥

तेषाम् — अनुपायसमावेशशालिनां, देहाद्यपेक्षया पुरोऽवभासमानमपि इदं सर्वं भावमण्डलं

'मत्त एवोदितमिदं मय्येव प्रतिबिम्बितम् ।
मदभिन्नमिदं च .... ॥'

पं० ४ क० पु० केनचिच्चिद्विकासेनेति पाठः ।
पं० ६ क० पु० योगी स परम इति पाठः ।

Indira Gandhi National Centre for the Arts

इत्यादिनीत्या पूर्णसंविन्मयतयैवावभासते इत्यर्थः, यदुक्तम्

'यथा रुमायां पतिताः काष्ठपर्णोपलादयः ।
लवणत्वाय कल्पन्ते तथा भावाश्चिदात्मनि ॥'

इति ॥३५॥

अत एवाह

एतेषां सुखदुःखांश-
शंकातंकविकल्पनाः ।
निर्विकल्पपरावेश-
मात्रशेषत्वमागताः ॥३६॥
एषां न मन्त्रो न ध्यानं
न पूजा नापि कल्पना ।
न समय्यादिकाचार्य-
पर्यन्तः कोऽपि विभ्रमः ॥३७॥

न केवलमेषामविकल्पकावेशमयत्वापत्तेः लौकिक्य एव कल्पनाः न किंचित्, यावदलौकिक्योऽपि, इत्याह 'एषामित्यादि' कल्यना—स्थानादिका ॥ ३६-३७॥

पं० ७ क० पु० सुखदुःखानां शङ्केति पाठः ।
पं० ६ क० पु० परामर्शमात्रेति पाठः ।
पं० १३ ग० पु० चर्यापर्यन्त इति पाठान्तरं चास्ति ।

Indira Gandhi National Centre for the Arts

ननु यद्येवं तर्ह्यस्य शेषवृत्तिः कथं स्यात् ? इत्याशंक्याह

समस्तयन्त्रणातन्त्र-
त्रोटनाटंकधर्मिणः ।
नानुग्रहात्परं किंचि-
च्छेषवृत्तौ प्रयोजनम् ॥ ३८ ॥

समस्ताः — निखिलाः शास्त्रोक्ता यन्त्रणा — 'इदं कार्यम् इदं न' इत्यादयो नियमाः, ता एव तन्यमानत्वात्तन्त्रं — पटाद्यारम्भकं तन्तुजालं, तस्य त्रोटनायां विच्छेदे, टंकधर्मिणः शस्त्रकल्पस्येत्यर्थः, यथा हि टंकस्तन्त्रं छिनत्ति, तथायमपि अनुपायसमाविष्टः शास्त्रीया यन्त्रणाः — नहि आरूढस्यास्य ततः कश्चित्संकोच इति भावः, शास्त्रं हि आरुरुक्षूनुपदेश्यान्प्रत्येव नियामकम्, इति समनन्तरमेवोक्तम्, अत एव चास्य स्वात्मनि कृतकृत्यत्वात्परानुग्रहार्थमेव वर्तनम् इत्याह

पं० ८ ख० पु० तन्यमानत्वात्तन्त्रं पटादि, तत्र त्रोटना अवच्छेदस्तदर्थं, टंकवद्विदारणधर्मिणः शस्त्रकल्पस्येत्येवंविधः पाठः ।

Indira Gandhi National Centre for the Arts

'नानुग्रहादिति' किंचिदिति— समयपरिपालनादि ॥ ३८ ॥

तदाह

स्वं कर्तव्यं किमपि कलयंल्लोक एष प्रयत्ना-
न्नो पारार्थ्यं प्रति घटयते कांचन स्वप्रवृत्तिम् ।
यस्तु ध्वस्ताखिलभवमलो भैरवीभावपूर्णः
कृत्यं तस्य स्फुटमिदमियल्लोककर्तव्यमात्रम् ॥ ३९ ॥

एष लोकः संकुचितः प्रमातृवर्गः तावत्

'............अभिलाषो मलोऽत्र तु ।'

इत्यादिनीत्या लौकिकाणवमलयोगादात्मन्यपूर्णं-मन्यतया 'किमपि' इति सामान्येन निर्देशात्सर्वमात्मीयं कर्तव्यं, यत्नतः—आकांक्षणीयत्वेन, कलयन्

'तदसिद्धं यदसिद्धेन साध्यते ।'

इत्यादिनीत्या यस्य स्वार्थ एव न सिद्धः स कथं परार्थं प्रत्यपि कांचन स्वल्पामपि स्वप्रवृत्तिं घटयते घटितापि वा तत्प्रवृत्तिर्न किंचित्कुर्यात् इति भावः, यः पुनरनुपायसमाविष्टत्वादेव खिलीकृत-

---

पं० २ ख० पु० पारक्यमिति पाठः ।

Indira Gandhi National Centre for the Arts

निखिलबन्धः, अत एव भैरवीभावेन भगवदद्वयज्ञानापत्त्या स्वात्मनि कृतकृत्यत्वेन — आकांक्षणीयस्यैवाभावात् पूर्णः — अनन्योन्मुखतया स्वात्मन्येव विश्रान्तः, तस्येयता निखिलस्य लोकस्य ग्रन्थकर्तव्यमवश्यं कार्यं स्वात्मप्रत्यभिज्ञापनं, तन्मात्रमेवेदं स्फुटम् — अपरिम्लानं कृत्यं — लोकानुग्रह एवास्य कर्तव्य इत्यर्थः, नहि अस्यात्मनि प्राप्तप्राप्तव्यत्वात्किंचित्करणीयमस्तीति भावः, यद्गीतं भगवता

'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥'

इति ।

'न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥'

इति च ॥३९॥

द्विविधाश्च परानुग्रहाः — निर्मलसंविदोऽनिर्मलसंविदश्च, तत्र निर्मलसंविदः प्रति तावन्निरुपकरणमेवास्यानुग्रहकारित्वम्, इत्याह

पं० १ क० पु० ज्ञेयज्ञानोपपत्त्या इति पाठः ।

Indira Gandhi National Centre for the Arts

तं ये पश्यन्ति तादृप्य-
क्रमेणामलसंविदः ।
तेऽपि तद्रूपिणस्ताव-
त्येवास्यानुग्रहात्मता ॥४०॥

ये पूर्वाभ्यासादिना निर्मलसंविदः, तीव्रतीव्रशक्तिपातभाजो वा, तं—समनन्तरोक्तस्वरूपं, तादृप्यक्रमेण पश्यन्ति 'निरुपायसमावेशभागयम्' इति ज्ञानपूर्वं साक्षात्कुर्वन्ति, अतस्ते परदर्शनमात्रेणैव तत्संवित्संक्रमात्

'......दीपाद्दीपमिवोदितम् ।'

इति वक्ष्यमाणनीत्या निरुपायसमावेशभाक्त्वेन तत्सदृक्षा एव भवन्ति इति शेषः, एवंरूपं सिद्धादिदर्शनं च निरुपायसमावेशे निमित्तम्, इति प्रागेव संवादितम्

'सिद्धानां योगिनीनां च दर्शनम्............ ।'

इत्यादि, अत एव तावती दर्शनमात्ररूपैवास्य अनुग्रहात्मता, न तु वक्ष्यमाणोपायादिसव्यपेक्षा, इत्यर्थः ॥ ४० ॥

Indira Gandhi National Centre for the Arts

ननु सर्वत्र दीक्षायाः

'........मुक्तिश्च शिवदीक्षया ।'

इत्याद्युक्त्या मुक्तावुपायत्वमुक्तम्, इति कथमत्र दीक्षां विनापि दर्शनमात्रादेव तदवाप्तिरुक्ता? इत्याशंक्याह

एतत्तत्त्वपरिज्ञानं
मुख्यं यागादि कथ्यते ।
दीक्षान्तं विभुना श्रीम-
त्सिद्धयोगीश्वरीमते ॥४१॥

एतस्य समनन्तरोक्तस्य निरुपायात्मनस्तत्त्वस्य परिज्ञानमेव मुख्यया वृत्त्या 'यागहोमादि' श्रीसिद्ध-योगीश्वरीमतादौ—सर्वत्रैवागमे 'विभुना' कथ्यते इति संबन्धः, अत एव च बाह्यं यागादि गौणम्—इत्यर्थसिद्धम्, अन्यथा ह्यस्य मुख्यत्वमेव न स्यात्, यदभिप्रायेणैव चर्याक्रमेऽप्येतन्निषिद्धम्, यदुक्तम्

'नास्य मण्डलकुण्डादि किंचिदप्युपयुज्यते ।
न च न्यासादिकं पूर्वं स्नानादि च यथेच्छया ॥'

इति ॥ ४१ ॥

तदेव पठति

पं० १४ क० पु० चर्यास्थण्डिलाद्यपि निषिद्धमिति पाठः ।

Indira Gandhi National Centre for the Arts

स्थण्डिलादुत्तरं तूरं
तूरादुत्तरतः पटः ।
पटाद्ध्यानं ततो ध्येयं
ततः स्याद्धारणोत्तरा ॥४२॥

ततोऽपि योगजं रूपं
ततोऽपि ज्ञानमुत्तरम् ।
ज्ञानेन हि महासिद्धो
भवेद्योगीश्वरस्त्विति ॥४३॥

स्थण्डिलं – यागार्थं गृहीतो भूप्रदेशः, तूरं – पात्रादावुत्कीर्ण आकारविशेषः। ज्ञानस्य सर्वोत्कृष्टत्वे हेतुमाह 'ज्ञानेन' इति, ज्ञानेन हि योगिनामपीश्वरः स्यादित्यर्थः, अत एव तदुपोद्बलनार्थं महच्छब्देश्वर-शब्दयोरपि प्रयोगः ॥४२-४३॥

अनिर्मलसंविदः प्रति पुनरस्य सोपकरणमेव अनुग्रहकारित्वम्, इत्याह

सोऽपि स्वातन्त्र्यधाम्ना चे-
दप्यनिर्मलसंविदाम् ।

Indira Gandhi National Centre for the Arts

अनुग्रहं चिकीर्षुस्त-
द्भाविनं विधिमाश्रयेत् ॥४४॥

स्वातन्त्र्यधाम्ना, न पुनः शास्त्रीययन्त्रणया — तत्त्रोटनायाः समनन्तरमेवोक्तत्वात् ॥४४॥

भावी च विधिः कीदृक्? इत्याह

अनुग्राह्यानुसारेण
विचित्रः स च कथ्यते ।
परापराद्युपायौघ-
संकीर्णत्वविभेदतः ॥४५॥

'परापर' इत्येकशेषः, तेन — परः शाम्भवः, अपरः आणवः, परापरः शाक्तः, संकीर्णत्वमुपायान्तरसाहित्यात् ॥४५॥

न केवलमस्य परानुग्रहार्थं भाविविध्याश्रयणमुपयुक्तं, यावत्तदभिधायकं शास्त्राद्यपि, इत्याह

तदर्थमेव चास्यापि
परमेश्वररूपिणः ।

पं० ३ क० पु० यन्त्रणायाः तत्त्रोटनस्येति पाठः ।

Indira Gandhi National Centre for the Arts

तदभ्युपायशास्त्रादि-
श्रवणाध्ययनादरः ॥४६॥

न केवलमारुरुक्षूणामेव शास्त्रमुपादेयं यावदस्यापि, इति अपिशब्दार्थः, यदुक्तम्

'शंकाशून्योऽपि तत्त्वज्ञो मुमुक्षुप्रक्रियां प्रति ।
न त्यजेच्छास्त्रमर्यादामित्याज्ञा पारमेश्वरी ॥'

इति ॥४६॥

नन्वेवमुपायमुखप्रेक्षित्वादस्य स्वातन्त्र्यहानिः स्यात्? इत्याशंक्याह

नहि तस्य स्वतन्त्रस्य
क्वापि कुत्रापि खण्डना ।
नानिर्मलचितः पुंसो-
ऽनुग्रहस्त्वनुपायकः ॥४७॥

नहि अस्य आरुरुक्षुवदात्मन्युपायापेक्षा येन स्वातन्त्र्यखण्डना स्यात्, किं तु स्वात्मनि कृतकृत्यत्वात्परार्थमस्य तत्स्वीकारः, यतः परेषामनिर्मलचित्त्वादुपायमन्तरेण न अनुग्रहः सेत्स्यति, इति—भाविविध्याश्रयणाद्यप्युक्तम्, यद्गीतं

Indira Gandhi National Centre for the Arts

'सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥'

इति ॥४७॥

न चैतत्स्वोपज्ञमेवास्माभिरुक्तम्, अपि तु भगवता, पूर्वाचार्यैश्च सर्वत्रैवोक्तम्, इति — निखिलस्य आह्निकार्थस्याविगीततां दर्शयितुमाह

श्रीमदूर्मिमहाशास्त्रे
सिद्धसंतानरूपके ।
इदमुक्तं तथा श्रीम-
त्सोमानन्दादिदैशिकैः ॥४८॥

ऊर्मिमहाशास्त्र इति — श्रीमदूर्मिकौलसिद्धसंतानरूपके, इत्यनेन पादोवल्ल्यां पारम्पर्येऽप्यम्लानत्वं दर्शितम्, तत्र हि

'शून्यं न किंचित्तच्छून्यं त्वशून्यं शून्यता नहि ।
यदकिंचित्कथं तद्धि न किंचिच्छेत्तुमर्हति ॥'

इति भगवत्या पृष्टो भगवान्

'आत्मा शून्य इह ज्ञेयः शिवधर्मैर्विनाकृतः ।
शिवः शून्योऽधिगन्तव्यो विमलोऽमूर्तविग्रहः ॥'

इत्याद्युपक्रम्य

Indira Gandhi National
Centre for the Arts

'नास्त्यस्ति नास्ति नास्तीति कोटयो न स्पृशन्ति हि ।
वाचामगोचरं यस्मात्तत्तत्त्वमिह कथ्यते ॥
यद्भावि न तद्भावि यद्भावि न तदन्यथा ।
एवं विचिन्त्य मतिमान्विकल्पं न समाश्रयेत् ॥
तच्च सर्वगतं सूक्ष्ममुपाधिपरिवर्जितम् ।'

इत्यादिपर्यन्तं बहूक्तवान् । श्रीमत्सोमानन्दादिदैशिकैः उक्तमिति —श्रीशिवदृष्ट्यादौ, यदुक्तं तत्र

'भावनाकरणाभ्यां किं शिवस्य सततोदितेः ।

इति ।

'सकृज्ज्ञाते सुवर्णे किं भावना करणं व्रजेत् ।
एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः ॥
ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना ।
करणेन नास्ति कृत्यं क्वापि भावनयापि वा ॥'

इति च ॥४८॥

तदेव सर्वत्रावधातव्यमित्याह

गुरोर्वाक्याद्युक्तिप्रचयरचनोन्मार्जनवशात्
समाश्वासाच्छास्त्रं प्रति समुदिताद्वापि कथितात् ।
विलीने शंकाभ्रे हृदयगगनोद्भासिमहसः
प्रभोः सूर्यस्येव स्पृशत चरणान्ध्वान्तजयिनः ॥४९॥

पं० १० क० पु० कारणमिति पाठः ।
पं० १३ क० पु० करणे नास्ति कृत्यं चेति पाठः ।
पं० १५ क० पु० तदेवमत्रापीति पाठः ।

Indira Gandhi National
Centre for the Arts

गुरोरित्यादिवाक्यात्सकृदुपदेशाद्यात्मनः 'आत्मैवेश्वरः सर्वज्ञः सर्वकर्ता च' इत्यादिकानां युक्तीनां प्रचयस्य या रचना—परपक्षबाधनस्वपक्षसाधनाधायिका शास्त्रपरिपाटी, तया उन्मार्जनं—बौद्धाज्ञानोत्पुंसनं, तद्वशात्—बौद्धज्ञानोदयेन स्वपरामर्शदार्ढ्यादित्यर्थः। शास्त्रं—प्रभुसंमितमद्वैतागमं प्रति समाश्वासात्प्रत्ययादिति, व्यस्तात्—गुरुतः शास्त्रतः स्वतः तीव्रतीव्रशक्तिभाजां, यद्वा समुदितात्—समस्तात्कथितात् एतस्मात्त्रयादपि तीव्रमध्यादिशक्तिपातभाजां, शंकाविकल्प एवावारकत्वादभ्रं, तस्मिन्विलीने सति, हृदयं—विमर्श एव अनवच्छिन्नत्वाद्गगनं तत्रोच्चैर्भासनशीलं—ज्ञत्वकर्तृत्वलक्षणं महः तेजो यस्य, अत एव ध्वान्तस्य स्वात्मप्रच्छादनेनोपाश्रितस्य द्वैतप्रथात्मकस्य अज्ञानस्य, जयिनः प्रभोः—विश्वात्मकत्वेन प्रभवनशीलस्य परमात्मनः, चरणान्—चरेर्गत्यर्थत्वादाणवादीनि ज्ञानानि, यूयं—समनन्तरोद्दिष्टाः तीव्रतीव्रादिशक्तिपातभाजः, स्पृशत—यथोत्तरं स्वात्ममयतयैव

पं० ७ ख० पु० शास्त्रात् स्वस्माद्यदा तीव्र इति पाठः।

Indira Gandhi National Centre for the Arts

भावयध्वमित्यर्थः, अत एव चास्य सूर्येणौपम्य-मुक्तं, तस्यापि हि अभ्रे गलिते गगनोद्भासित्वेन अन्धकारं निराकुर्वतः पादस्पर्शः उचितः ॥४६॥

इदानीमाह्निकार्थं श्लोकस्य प्रथमार्धेनोपसंहरति

इदमनुत्तरधामविवेचकं
विगलितौपयिकं कृतमाह्निकम् ।

उपाय एवौपयिकमिति शिवम् ॥

तत्तद्ग्रन्थाधिगमो-
पायशतान्वेषणप्रसक्तेन ।
अनुपायाह्निकमेतद्
व्याख्यातं जयरथेनाशु ॥

इति श्रीमदाचार्याभिनवगुप्तपादविरचिते, श्रीजयरथाचार्यकृतप्रकाशाख्यव्याख्योपेते श्रीतन्त्रालोके अनुपायप्रकाशनं नाम द्वितीयमाह्निकम् ॥२॥

एतत्काश्मीरभूपालसंश्रितेन प्रकाशितम् ।
सता मुकुन्दरामेण सन्मुदेऽस्तु शिवेऽर्पितम् ॥

पं० ६ क० पु० स्वात्मतयेति पाठः ।

पं० ७ क० पु० जयरथेन चित्रम् इति, ग० पु० जयद्रथेन रचितमिदमिति पाठः ।

IGNCA
Acc. No. 95-57028
Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts